Topic 56

श्री, चतुर् तथा स्त्री शब्द

त्रिचतुरोः स्त्रियां तिसृचतसृ ।
स्त्रीलिङ्गयोरेतयोरेतौ स्तो विभक्तौ ।

अचि र ऋतः ।
तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि ।
गुण - दीर्घोत्वानामपवादः । तिस्रः । तिस्रः । तिसृभिः
तिसृभ्यः । आमि नुट् ।

प्रस्तुत सूत्र गुण, दीर्घ और उत्व -
का अपवाद है ।

न तिसृचतसृ ।
एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु । द्वे । द्वे ।
द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः । गौरी । गौर्यौ । गौर्यः ।
हे गौरि । गौर्यौ इत्यादि एवं नद्यादयः । लक्ष्मीः ।
शेषं गौरीवत् । एवं तरीतन्त्र्यादयः । स्त्री । हे । स्त्रि ।

स्त्रियाः
अल्यैयङ् स्यात् अजादौ प्रत्यये परे ।
स्त्रियौ । स्त्रियः

वाभ्यशसोः ।
अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम् ।
स्त्रीम् । स्त्रियः । स्त्रीः । स्त्रियौ । स्त्रियौ । स्त्रियाः ।
परत्वान्नुट् - स्त्रीणाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियः ।

स्त्रियम्

स्त्री + अम्	द्वितीया एकवचन की विभक्ति में अम्
स्त्र् + इयङ् अम्	वैकल्पिक इयङ् अन्तादेश